**शुल्व** माने दाने च चु०उभ०सक०सेट्। शुल्वयति ते अशुशुल्वत् त। [४आचारे ५यज्ञकार्य्ये च मेदि०।

**शुल्व** न०शुल्व–अच्। १ताम्रे २रज्जौ च अमरः ३जलसमीपे

**शुल्वारि** पु० ६त०। १गन्धके हेमच० तस्य ताम्रादिजारकत्वात् तथात्वम्।

**शुश्रू** स्त्री मातरि “शिशोः शुश्रूषणात् शुश्रूः” भा०शा०अ०

**शुश्रूषण** न० श्रु–सन्–ल्युट्। १सेवायां शब्दच०। युच्। तत्रैव स्त्री २श्रवणेच्छायाञ्च। [च।

**शुश्रूषा** स्त्री श्रु–सन्–अ। १श्रवणेच्छायाम् २उपासने ३कथने

**शुष** शोषणे दि०पर०सक०अनिट्। शुष्यति लृदित् अशुषत्।

**शुष** पु० शुष–क। १गर्त्ते २बिले च अजयपालः।

**शुषि** स्त्री शुष–कि। १पाषाणे २बिले च मेदि०।

**शुषिर** न०शुष–किरच्। १छिद्रे २वंशाद्यादिवाद्ये ३सच्छिद्रे त्रि० अमरः ४मूषिके पुंस्त्री० मेदि० स्त्रियां ङीष्। ५अग्नौ पु० विश्वः। ६चित्रकवृक्षे ७नद्यां स्त्री धरणिः। लवलीनामगन्धद्रव्ये स्त्री अमरः। [२शोषणे न०।

**शुष्क** त्रि०शुष+क्त। आतपादिना १कृतशोषणे। भावे क्त।

**शुष्कपत्र** न० शुष्कं पत्रमस्य। (नालता) १शाकभेदे। “शुष्कपत्रं पयोमिश्रं पित्तश्लेष्मज्वरापहम्। तत् शुष्कपत्रं जलदोषनाशनं विशेषतः पित्तकफज्वरापहम्। जलञ्च तस्यापि च पित्तहारकम् सुरोचनं व्यञ्जनयोगकारकम्” राजवल्लभः। कर्म०। २शुष्के पर्णे न०

**शुष्कमांस** न० कर्म०। आतपादिना शुष्कमांसे तद्गुणा भावप्र० उक्ता यथा “त्रिदोषकृत् व्यालजुष्टं शुष्कं शूलकरं गुरु” मांसमित्यनुषङ्गः।

**शुष्करेवती** स्त्री मातृकाभेदे “अभिरक्ष्य तथा काली दृष्टा पूर्वं महात्मना। तया तद्रुधिरं पीतमन्धकानां महात्मनाम्। सा चास्मिन् कथिता लोके नामतः शुष्करेवती” वह्निपु० १५४अ०।

**शुष्कल** न० शुष्कं शोषणं लाति ला–क। १शुष्कमांसे। शुष–कलच् किच्च। २आमिषे उणादि०।

**शुष्कवृक्ष** पु० कर्म०। धवहक्षे राजनि०।

**शुष्कवैर** न० शुष्कं फलशून्यं वैरम्। उद्देश्यशून्ये कलहे।

**शुष्कव्रण** पु० कर्म०। (घँटा) किणरूपे व्रणे त्रिका०।

**शुष्काक्षिपाक** पु० नेत्ररोगभेदे तल्लक्षणं भावप्र०उक्तं यथा “यत् कूणितं दारुणरूक्षवर्त्म सन्दृह्यते चाविलदर्शनं यत्। सुदारुणं यत्प्रतिबोधने च शुष्काक्षिपाकोपहतं तदक्षि”। कूणितं सङ्कोचितं मुद्रितमिति यावत्। दारुणरूक्षवर्त्म दारुणं विकृतं रूक्षं च वर्त्म यस्य तत्। इदमक्षणोविशेषणं सन्दृह्यते सदाहं भवति। आविलदर्शनम् आविलस्य अनच्छस्य दर्शनं येन तत्। तत्प्रतिबोधने उद्घाटने, सुदारुणम् अतिशयेन विकृतम्”।

**शुष्काङ्ग** पु० शुष्कमङ्गमस्य। १धवहक्षे (धगाछ) २शुष्कावयवयुते त्रि०स्त्रियां ङीष्। सा च ३गोधिकायां शब्दच०

**शुष्कार्द्रक** न० शुष्कमार्द्रकम्। शुण्ठ्यां (शुँठ) शब्दच०।

**शुष्म** न० शुष–मन् किच्च। १तेजसि मेदि० २पराक्रमे हेमच०। ३सूर्य्ये पु० मेदि० ४अग्नौ त्रिका० ५चित्रकवृक्षे ६वायौ ७पक्षिणि संक्षिप्तसा० दर्शार्चिषि च पु० भरतः।

**शुष्मन्** न०शुष–उणादि मनिन्। १तेजसि जटा०। २शौर्य्ये हेमच० ३अग्नौ ४चित्रकवृक्षे च पु० अमरः।

**शूक** पु० न० श्वि–कक् सम्प्र०। (शुङ्गा) १तीक्ष्णाग्रे अमरः। २शिखायां ३दयायां मेदि० ४सविषजलसत्वोद्भवे जन्तुभेदे भावप्र० तद्दोषाधिकारेण तज्जातरोगास्तत्र दर्शिता यथा “अथ शूकदोषाधिकारः। तत्र शूकदोषस्य निदानमाह “अक्रमाच्छेफसो वृद्धिं योऽभिवाञ्छति मूढधीः। व्याधयस्तस्य जायन्ते दश चाष्टौ च शूकजाः”। अक्रमात् अनुचितवृद्धिक्रमात्। अनुचिता च वृद्धिः भूरिविकारजनकस्य योगेन शूकजाः शूकोजलशूकः सविषो जलजन्तुविशेषः स तु जलसत्वोद्भवः अलगर्द्दसहश इत्यादिकः। तथा शूकप्रधानो लिङ्गवृद्धिकरो वात्स्यायनाद्युक्तो रोगः शूक उच्यते”। शूकदोषा दश चाष्टौ च भवन्ति। तेष्वादौ सर्षपिकामाह “गौरसर्षपसंस्थाना शूकदुर्भग्नहेतुका। पिडका श्लेष्मवाताभ्यां ज्ञेया सर्षपिका१ तु सा। शूकदुर्भग्नहेतुका शूकदुष्टयोनिनिमित्ता च। अथाष्ठीलिकामाह “कठिना विषमैर्भुग्नैर्वायुनाष्ठीलिका२ भवेत्”। अष्ठीला लौहकारस्य भाण्डविशेषः (निहार) इति लोके। तथा कठिनैरष्ठीलिका विषमैर्भुग्नैरिति वक्ष्यमाणपूर्णविशेषणम्। विषमैरुच्चदीर्घैः। भुग्नैः वक्रैः। ग्रथितमाह “शूकैर्यत् पूरितं शश्वद्ग्रथितं३ नाम तद्भवेत्”। यल्लिङ्गं सदा शूकैः पूरितं तद्ग्रथितत्वाद्ग्रथितम्। कुम्भिकामाह “कुम्भिका४ रक्तपित्तात् स्याज्जाम्बवास्थिनिभा सिता” कुम्भिका कुम्भीफलतुल्यत्वात्। अलजीमाह “अलजी५ स्यात्तथा यादृक्प्रमेहपिडका तथा। सा च रक्ताऽसिता स्फोटाचिता च कथिता बुधैः”। एषा रक्तपित्तनिमित्ता ज्ञेया। मृदितमाह “मृदितं६ पीडितं यत्तु संरब्धं वातकोपतः।